International Journal of Sanskrit Research 2017; 3(1): 130-133

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(1): 130-133
© 2017 IJSR
www.anantaajournal.com
Received: 17-11-2016
Accepted: 18-12-2016

श्रीमती दीपिका
शोध छात्रा, साहित्य विभाग,
उत्तराखण्ड संस्कृत विश्वविद्यालय,
हरिद्वार, उत्तराखण्ड, भारत

**Correspondence**
श्रीमती दीपिका
शोध छात्रा, साहित्य विभाग,
उत्तराखण्ड संस्कृत विश्वविद्यालय,
हरिद्वार, उत्तराखण्ड, भारत

# कुमुदिनीचन्द्रोपन्यासे भारतीयसंस्कृतेः महत्त्वम्

श्रीमती दीपिका

## प्रस्तावना

भारतीया संस्कृतिः विश्वस्य अशेषासु संस्कृतिषु प्राचीनतमा श्रेष्ठतमा चास्ति।[1] परमपितुः परमेश्वरस्य निःश्वासभूता वेदाः अस्माकं संस्कृतेः आधाराः सन्ति। वेदप्रतिपादितनियमानामाचारेण एव मानवोऽस्मिन् लोके परत्र च सुखानि विन्दते। भारतदेशे विविधानां संस्कृतीनां सभ्यतानां च समावेशो विद्यते। धर्मप्रधानो भारतदेशः। पुरुषार्थचतुष्टये अपि धर्मस्यैव प्रधानता अस्ति। प्राचीनैः मनीषिभिः ऋषिभिः धर्मविषये गहनं चिन्तनमकारि। प्राचीने वैदिकलौकिकसंस्कृतसाहित्ये धर्मस्य विविधाः परिभाषाः दृष्टिपथमायान्ति। को नाम धर्म इति जिज्ञासायां जगन्मूलत्वेन संसृतिनियामकानि तत्त्वानि धर्मः इति व्यपदिश्यन्ते। यत्र जगद्धारकत्वं तत्र धर्मत्वम्। के च ते गुणाः ये इदं जगद् धारयन्ति? एतेगुणा महर्षिणा पतञ्जलिना योगदर्शने यमशब्देन व्याख्याताः। [2] एषां प्रयोजनं च प्रतिपादयता पतञ्जलिना अभिधीयते यत् एते यमाः सार्वभौमाः महाव्रतं सन्ति। [3]
तत्र शौच-सन्तोष-तपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। [4] मनुना स्फुटमेतत् प्रतिपद्यते यत् यमाः एवानिवार्यत्वेन सेव्याः। एषाम् अनाश्रये पतनम् अवनतिश्च-

> यमान् सेवेत सततं न नित्यं नियमान् बुधः।
> यमान् पतत्यकुर्वाणो नियमान् केवलान् भजन्।। [5]

मनुना धृति-क्षमादयो दश गुणा एव धर्मशब्दवाच्यत्वेन निर्दिष्टाः।

> धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
> धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।। [6]

वैशेषिकदर्शनकृता कणादेन प्रतिपाद्यते यत् येन लौकिकी पारलौकिकी य समुन्नतिः संजायते स एव धर्मशब्देन वाच्यः। एवं लोकपरलोकोभयसाधकानि तत्त्वानि धर्मशब्दवाच्यानि- यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः। मीमांसादर्शनकृता जैमिनिमुनिना धर्मलक्षणं निर्दिश्यते यत्- चोदनालक्षणार्थो धर्मः।[7]
आचार्यो मेधाव्रतः विलक्षणः कविर्बभूव। सः आचार्य आसीत्, नैकेषु गुरुकुलेषु स पाठयति स्मः। तस्य वाचि भारती विराजते स्मः। आचार्यस्यास्य सकलं जीवनं धार्मिकमासीत्। महर्षिदयानन्दस्य अयमनन्यो भक्त आसीत्। स्वामिनो दयानन्दस्य जीवनेन अयं नितरां प्रभावितः आसीत्। स्वामिनो दयानन्दस्य प्रभावेण असावपि अत्यन्तः धार्मिक आसीत्। आचार्यस्य मेधाव्रतस्य धार्मिकी वृत्तिस्तस्य काव्येष्वपि दरीदृश्यते। कुमुदिनीचन्द्रेऽपि अनेकत्र धार्मिकी भावना प्रतिपादिता कविना।
कस्यापि राष्ट्रस्य समाजस्य च जीवितं प्राणदं तत्त्वं वा संस्कृतिर्भवति। यैः आदर्शैः समाजः गतिमान् उन्नतिमान् सरसश्च संजायते ते एव आदर्शाः संस्कृतिपदेन अभिधीयन्ते। विश्वस्मिन् विश्वे प्राचीनतमा श्रेष्ठतमा उदात्ततमा

च भारतीया संस्कृतिः। विश्वस्य नैकाः संस्कृतयः विनाशं गताः किन्तु स्वस्याः श्रेष्ठतायाः कारणेन अद्यापि वर्धमानास्ति अस्माकीना संस्कृतिः। आस्तिकता, पुनर्जन्म, कर्मफलसिद्धान्तः, संस्काराः, चतुर्वर्गस्य संकल्पना, वसुधैव कुटुम्बकमिति उदात्तभावना, परोकारस्य प्रधानता, सर्वभूतहितकामना, अहिंसादयः गुणाः भूषयन्ति संस्कृतिं भारतीयाम्।

महाकविः मेधाव्रतः अनन्यसमुपासको भारतीयसंस्कृतेः। तस्य कुमुदिनीचन्द्रे काव्ये पदे-पदे भारतीयसंस्कृतेः स्वरूपं महिमा महत्त्वं च दरीदृश्यते। अस्य काव्यस्य पात्राणि प्रामुख्येन द्विविधानि सन्ति-सुरतुल्यानि असुरतुल्यानि च। देवतुल्यानां पात्राणां व्यवहारे भारतीयसंस्कृतेः स्वरूपं दृश्यते।

अस्माकं संस्कृतौ नरः नारीं संरक्षति। किन्तु कदापि कदापि असौ रक्षक एव भक्षकः सम्पद्यते। कुमुदिनीचन्द्रकाव्ये चन्द्रसिंहरणवीरौ नारीसंरक्षकौ स्तः धूर्त्तः क्रूरसिंहश्च स्त्रीणां चरित्रस्य नाशकोऽस्ति। असो क्रूरसिंह एव अस्कीनां संस्कृतिं निन्दयति स्वाचरणेन।

क्रूरसिंहः नायिकायाः कुमुदिन्याः बलात् अपहरणं करोति। धूर्त्तः क्रूरसिंहः नायिकायाः शीलं नाशयितुं प्रयतति। क्रूरसिंहस्य क्रूरं व्यवहारं समवलोक्य नायिका कुमुदिनी निगदति यत्- वीराः हि नारीणां पूजितारः रक्षितारश्च भवन्ति। न हि परदारान् ते स्पृशन्ति, कलुषितभावनया च पश्यन्ति। निसर्गपावनं हि तासां हृदयम्। त्वं वृथैव अन्यथा चिन्तयसि। यस्य नास्ति कोऽपि सहायकः संरक्षकश्च लोके प्रभुरेव तस्य सहायकः संरक्षकश्च भवति। विपल्लीनां द्रौपदीं भगवान् श्रीकृष्ण एव संररक्ष-

> वीरमणयो हि रमणीनां रक्षितारो भवन्ति न भक्षितारः ............ .... यस्य कोऽपि सहायको नास्ति प्रभुस्तस्य सहायक इति। [8]

नृपस्य वीरसिंहस्य शासने सर्वाः प्रजाः संस्कृतौ अनुरक्ताः अस्ति। राज्यस्य सर्वे नागरिकाः शास्त्रविधिना स्वीयानि कर्त्तव्यानि परिपालयन्ति। शास्त्रानुसारमेव दिनचर्यायामासक्ताः सन्ति। ब्राह्मे मुहूर्त्ते समुत्थाय दैनिन्दिनीं क्रियां सम्पाद्य साम्प्रतं करुणावरुणालयस्य परब्रह्मणः चिन्तने निमग्नाः सन्ति सत्पुरुषाः-

> सर्वतः किञ्चित्किञ्चित्प्रकाशः संवृत्तोऽस्ति। ब्राह्ममुहूर्त्ते समुत्थाय विधाय च शौचपूर्विकां क्रियां साम्प्रतं परमानन्दकन्दपरब्रह्मणि निमग्नचेतसो वर्तन्ते ब्रह्मविदः सत्पुरुषाः। अलिन्देषूपविश्य विद्यार्थिसन्दोहः समस्तककम्पं स्वपाठं रटति। [9]

भूपतिः विजयसिंहो योगिवेशं चन्द्रसिंहं स्वीये राज्ये निवासाय निर्दिशति किन्तु क्षत्रियधर्मस्य वेत्ता चन्द्रसिंहः निगदति यत्- भो राजन्! क्षत्रियस्तु गवां आर्त्तानां सतां च संरक्षको भवति। शत्रून् पराजित्य क्षत्रियः स्वीयां यशोगाथां चतुर्दिक् वितनोतु। एवं यो न आचरति स चाण्डालो भवति। चन्द्रस्य क्षत्रियत्वं कविना काव्ये एवं वर्णितम्-

यहाहं निजपितुरपहृतं राज्यं पुनः प्राप्स्यामि, शत्रुशोणितेन आत्मकरो रञ्जयिष्यामि, यदा स्वीयमभीष्टं वस्तु प्राप्स्यामि तदैव आत्मानमानन्दयिष्यामि। साम्प्रतं वैरशुद्धिं विना नास्ति अन्यद् किञ्दिपि किमपि प्रयोजनम्-

> यदाहं निजपितुराहृतं राज्यं पुनः सम्पादयिष्यामि, रिपूणां रुधिरैरात्मकरौ रञ्जयिष्यामि, यदा चाहं निजाभिलषितं वस्तु प्राप्स्यामि तदैवात्मानमानन्दयिष्यामि। सम्प्रति हि वैरशुद्धिं विना नान्यन्मम प्रयोजनम्।[10]

महाराजो केसरीसिंह विपद्ग्रस्तानां जनानां सहयोगाय सततं प्रयतते। स सदैव सर्वभूतहिते रतो भवति। शरणागतस्य दीनार्त्तस्य रक्षास्माकं संस्कृतौ प्रमुखा। भावनेयं महाराजे केसरीसिंहे बलीयसी अस्ति। सः वदति-

> सूर्यसिंह! शरणागत परिपालनं हि क्षत्रियाणां परमो धर्मः।[11]

यस्य संरक्षकः ईश्वरो भवति तस्य विघाते न कोऽपि समर्थो भवति। लोकोक्तिरियं रणवीरसिंहोऽपि चरितार्थयति। कारागारे बद्धं रणवीरसिंहं क्रूरसिंहो यदि बलिकर्मणे सम्प्रदातुमिच्छति तदा रणवीरस्य संरक्षणाय तत्र योगी एकः प्रादुर्बभूव। स योगी बलिकर्म निन्दति प्रतिषेधयति च। असौ योगी क्रूरं क्रूरसिंहं शपति यत्- त्वं आपञ्च वर्षं बालकं स्थानमिदं च विस्मरिष्यसि। एतेषु पञ्चसु वर्षेषु चन्द्ररणवीरयोः सम्मेलनमपि सञ्जायते। अरक्षितमपि तिष्ठति दैवरक्षितम्। परमार्थमेवोक्तम्-

> परं को नु खलु हन्यात् प्रभुरक्षितम्।[12]

व्यतीतेषु पंचसु वर्षेषु क्रूरसिंहः कृतानि अकृत्यानि सञ्चिन्त्य महान्तं खेदमनुभवति। स पश्चात्तापस्य शौकाग्निः जाज्वल्यमानो वरिवर्ति। तस्य इमामवस्थां सन्दृश्य चन्द्रसिंहो निगदति यत्- यदि त्वया पूर्वं सुचिन्त्य कार्याणि न कृतानि अतस्त्वमधुना ईदृशः संवृत्तः। विपत्तिकाले बुद्धिः कुण्ठिता भवति- विनाशकाले विपरीतबुद्धिः। विनाशकाले निखिलापि चतुरता विलीयते।

आचार्यो मेधाव्रतः ईश्वरभक्त आसीत्। तस्य काव्येषु अपि एतस्याः भावनायाः नैकत्र सञ्चारं दरीदृश्यते। सर्वेषु पात्रेषु अस्याः भावनायाः उपलब्धिर्भवति। निर्जने विपिने अपहृता कुमारी ईश्वरभक्त्याः भावनया एव आत्मानं संरक्षयति। सा दृढं विश्वसिति यत् ईश्वरः नूनं मां अस्मात् दुःखसागरात् शीघ्रमेव रक्षयिष्यति। तस्या अयं विश्वासोऽपार्थो नास्ति। एतस्मिन् विपत्काले सहसैव चन्द्रसिंहस्तस्याः रक्षां कर्तुं समुपस्थितो भवति। पथिका अपि तस्याः रक्षायै सन्नद्धाः भवन्ति। चन्द्रसिंहः वदति यत्- भो दुष्टहतक! कामपि निर्दोषां बालिकामपकृत्य आत्मानं वीरं मन्यसे। भगवान् सर्वेषां शरण्यः अस्ति लोके। स एव मामत्र प्रेषितवान्। मन्त्री महाराजो युवराजश्च तयोः प्रतीक्षां कुर्वन्ति। एतस्मिन् विपत्काले महाराजः प्रभुमेवाराधयति-

आ प्राचीनकालादेव भारतीयसंस्कृतौ स्त्रीणां महत्त्वपूर्णं स्थानमस्ति। संसारस्य अस्तित्वमेव नास्ति नारीं विना। पुरुषोऽपि नारीं विना सम्पूर्णो नास्ति। अत एव समाजे नारीणां महत्त्वं सर्वोपरि अस्ति। नार्यः परुषमपि पुरुषहृदयं स्नेहरसेन क्लेदयन्ति। कुमुदिनीचन्द्रकारोऽपि किमपि इत्थमेव प्रतिपादयति-

> ललनोपकण्ठगता दर्शशालिनोऽपि पुरुषा नम्री भवन्ति। [13]

राजकुमारः चन्द्रसिंहोऽपि नारीः नितान्तं अद्रियते। अस्मात् भवसागरात् स्त्री एव पुरुषं तारयति। नार्यः अभावे सः भवसागरमिमं सन्ततुमसमर्थोऽस्ति। यथा नौकायाः कृते तरणदण्ड आवश्यकः तथैव पुरुषायापि नारीणां महती आवश्यकता। वस्तुतस्तु नारी अपि रत्नकर इव अस्ति। सा एव रामकृष्णसदृशाणि महार्घाणि रत्नानि समाजाय प्रयच्छति। नैकानि अन्यानि अपि अमूल्यानि रत्नानि अस्मभ्यं प्रदत्तानि नारीभिः। ये जनाः नारीं निन्दन्ति ते अधमा एव। संसारस्य सृष्टिप्रक्रिया एव नारीं विना न कथमपि सम्भवति?

निजकर्त्तव्यस्य परिपालनमपि धर्म एव। नृपप्रजाः, गुरुशिष्याः, दम्पती, पितरौ, यत् कर्त्तव्यं निर्वहन्ति तदेव धर्मः। कुमुदिनीचन्द्रकाव्येऽपि सर्वाणि पात्राणि स्वस्य कर्त्तव्यस्य परिपालनं श्रद्धया कुर्वन्ति। नृपः केसरीसिंहः यथाविधि राज्यं परिपालयति। तस्य राज्ये प्रजाः सुखेन शान्त्या च वसन्ति। नृपस्य कार्यव्यवहारेण प्रजाः सन्तुष्टाः सन्ति। असौ नृपः नैकानि राज्यानि विजितवान्। नृपस्य केसरीसिंहस्य कर्त्तव्यानि एवमुल्लिखितानि कविना मेधाव्रतेन- अस्तीतः शते क्रोशे दूरे रमणीयकं चरमजितदुर्गाख्यं नाम विशालं राजनगरम्। यत्र शोभनदर्शना, पुष्पिततरुमण्डिततीरा, शीतलविमलनीरा, गम्भीरा, विपुलवारि पुष्पभद्रा नाम्नी नदी प्रवहति। अस्या एव पावननद्यास्तीरे प्रकृतिदक्षिणः, प्रजानुरञ्जनचतुरः, सकलनीतिनिपुणो, वीरशिरोमणिः, नृपश्रेष्ठः केसरीसिंहनामा नृपः-

> अस्तीतः शतक्रोशमिति दूरे रमणीयमेकमजितचनमजिवदुर्गाख्यं विशलं राजनगरम्। ................ यदधिवसति स्म प्रकृतिहृदयरञ्जनचतुरो नीतिनिपुणो वीरवरो महाराजश्रीकेसरीसिंहनामा नृपवरः। [14]

तस्मिन्नेव काले अमरकण्टकाधिपतिः महाराजः रणजीतसिंहः परराष्ट्रेषु आधिपत्यं करोति स्मः। असौ वीरविक्रमो नृपः लोके स्वपराक्रमेण विश्रुत आसीत्। महीपालोऽयं तस्य कालस्य वीरवरेषु अग्रगण्य बभूव। नैकानि राष्ट्राणि विजित्य असौ महीश्वरपदं प्राप्नोत्। सर्वेषु नृपेषु आसीत् आतंकोऽस्य महीपालस्य। किन्तु ईशकृपया असौ महाराजस्य केसरीसिंहस्य दुर्गे आधिपत्ये समर्थो नाभवत्-

> क्षितिपालोऽयं वीराग्रगण्यो गण्यते ......... परं परमेश्वरकृपया महाराजकेसरीसिंहस्य बाहुबलेन चायमजितदुर्गपर्यन्तं नागन्तुं शशाक। [15]

नृपो विजयसिंहः स्वामात्मजां कुमुदिनीं पुत्रीयति। आत्मजायाः कुमुदिन्या अपहरणस्य सन्देशं श्रुत्वा खिन्नः दुःखितश्च नृपो विजयसिंहः कालयापने महान्तं खेदमन्वभवत्। पुत्र्याः सकुशलं प्रत्यागमनाय सततं परमेश्वरं प्रार्थितवान्। राजकुमार्या अभावे असौ शून्यमिव जगदिदमनुमेने। कुमुदिन्याः प्रत्यागमनस्य वृत्तान्तं श्रुत्वा अपरिमेयां प्रसन्नतामन्वभवत्। कुमुदिन्याः संरक्षकमपि स उदारमना अभिनन्दनमकरोत्। राजा विजयसिंहः योग्यः पिता आसीत्। सुयोग्येन वरेण सह कन्यायाः विवाहसम्पादनमपि पितुर्दायित्वं भवति। नृपः विजयसिंहोऽपि श्रद्धया स्वीयान् दायित्वान् निरवहत्। योग्येन चन्द्रसिंहेन सह स राजकुमार्याः विवाहं कारितवान्। राजपुरोहितः मधुपर्कादिभिरर्घ्यैः देवान् समर्च्य शास्त्रविधिमनुसृत्य चन्द्रसिंहकुमुदिन्योः विवाहं सम्पादितवान्-

> वेदविधिना राजपुरोधा वध्वा मधुपर्कादिभिरर्घ्यैर्वरदेवमर्चयित्वा समन्त्रपाठं तयोः पाणिग्रहणमंगलं कारायामास। [16]

सवेदपाठं तौ कृशानौ हव्यं सम्प्रदाय सप्तपदविधिं सम्पादितवन्तौ। पाणिग्रहणविधिं सम्पाद्य तौ पितरौ बान्धवाञ्च नमस्कृत्य आशीर्वचांसि अलभताम्। महाराजेन बान्धवैः नगरश्रेष्ठिभिश्च वरवधूभ्यां नैकानि उपाहराणि प्रदत्तानि। [17]

महाराज्ञी प्रभावती अपि स्वानि कर्त्तव्यानि यथाविधि पालयति स्मः। सा स्वीयायै अनन्यायै कन्यायै एवं प्रकारेण धर्ममुपदिदेश- सुते कुमुदिनि! बुद्धिमती गुणवती, प्रबुद्धा चासि। विदितवेदितव्यायै तुभ्यं न किञ्चिदपि उपदेष्टव्यमस्ति। त्वं पतिकुलं गत्वा गुरून् शुश्रूषस्व, पतिं सेवस्व, मान्यान् मानय, परिजनान् प्रति दक्षिणा भव। अनुकूले प्रतिकूले वा काले पतिरेव तव देवता। सर्वासु अवस्थासु पतिरेव तव भूषणमिति। नारीणां शीलमेव परमभूषणम्। प्राणपरित्यागेनापि संरक्षणीयं शीलम्। मनसा वाचा कर्मणा सततं परमात्मानं परमेष्ठिनं चिन्तय, ध्यायय। स्वकर्त्तव्येषु अप्रमत्ता भव। सदैव दुर्जनैः दूरं भव। सम्पत्तौ अतिहर्षः, विपदि अतिखेदः, अभ्युदये गर्वः न कदापि त्वया कर्त्तव्या। यदि एवं त्वं व्यवहरिष्यसि नूनमीश्वरः तव भद्रं करिष्यति-

> वत्से! कुमुदिनि! त्वं बुद्धिमती सद्गुणवती चासि। नि किमप्युपदेष्टव्यं ते। परमन्तिममिमं मदुपदेशं श्रृणु- स्त्रीणां पतिरेव देवः। सततं तस्मिन् एव मनो निधेयम्। [18]

चन्द्रसिंहोऽपि अनन्यः कर्त्तव्यनिष्ठः आसीत्। स कुमुदिन्यां बहुशः स्निह्यति स्मः। प्रियाभावे स जगदिदं शून्यमिव अमन्यत। क्रूरः क्रूरसिंहो यदा कुमुदिनीमपहरति विरहेण आकुलः स महान्तं खेदमनुभवति। प्रियावियोगे चन्द्रसिंहः न हि राज्यं चिकीर्षति। अस्यां स्थितौ मन्त्रिभिः स द्वितीयाय विवाहाय प्रबोधितः किन्तु स न स्वीकृतवान् मन्त्रिणामेतां मन्त्रणाम्। तस्य जीवनमपि केवलं कुमुदिन्याः कृते एव बभूव।

रणवीरस्य अपहरणकाले चन्द्रसिंहः योग्यपुत्र इव कर्त्तव्यानि पालयन् जनकं केसरीसिंहं सान्त्वयति भ्रातरं च मार्गयति। भ्रातुः गवेषणायामसमर्थः सन् नितान्तां खिन्नतामनुभवति। वत्स रणवीर! न जाने कदा तव मुखचन्द्रिका सन्तर्पयिष्यति मे नयनचकोरम्। हाः दुर्लभो मे पुनस्त्वादृशो बन्धुर्लोकेऽस्मिन्। त्वां विना कथं जीवितं धारयिष्यामि। त्वया विना असारोऽयं संसारः। अहोः अनवधिरयं भ्रातृप्रेमपारावरः। भो भ्रातः त्वया विना न गमिष्यामि अहमपि राजधानीम्-

> भ्रातः! त्वामनादाय कदाप्यहं पुनरजितदुर्गराजधानीं न गमिष्यामि। ननु क्वासि वत्स रणवीर? [19]

सकलकलाकलापकलनः जगदीश एव अस्य चराचरस्य लोकस्य कर्त्ता हर्त्ता भर्त्ता चास्ति। एतस्य परमेश्वरस्य महिमा निखिले लोके वरीवर्ति। लोकस्य सकलानि अपि कृत्यानि एतस्य लोकेश्वरस्य ईहया एव भवन्ति। महामना आचार्यः मेधाव्रतः क्रान्तदर्शी कविः आसीत्। तस्य दर्शनं नितान्तं मानवहितकरमस्ति। तस्य सर्वस्यां काव्यरचनायामेतस्य दर्शनस्य अभिव्यक्तिः भवति। सः मुख्यतः त्रैतवादस्य पोषकः समर्थकश्चासीत्।

सः ईश्वरस्य जीवस्य प्रकृतेः च सत्तां स्वीकरोति। एतेषामेव तत्त्वानां स स्वीये काव्ये अनेकत्र प्रतिपादनं करोति। स पुनर्जन्मविषये विश्वसिति। आचार्यस्य मेधाव्रतस्य दृढविश्वासः अस्ति यत् मानवः यादृशानि कर्माणि करोति तादृशमेव फलं प्राप्नोति। ईश्वरः प्राणिभ्यः तेषां कर्मणामाधारेण न्यायेन फलं वितरति।

संधर्व सूची


1. सा प्रथमा संस्कृतिर्विश्ववारा।
2. अहिंसासत्यास्तेयब्रह्मचर्यपरिग्रहा यमाः। योगदर्शन 2/30
3. जातिदेशकालसमयानवच्छिन्नाः सार्वभौमाः महाव्रतम्। योग 2/31
4. योगदर्शन 2/32
5. मनु0 4/204
6. मनु0 6/92
7. मीमांसा 1/1/2
8. प्रथमा कला पृ0 7
9. द्वितीया कला पृ0 16
10. द्वितीया कला पृ0 20
11. चतुर्थी कला पृ0 45
12. पञ्चमी कला पृ0 54
13. द्वितीया कला पृ0 21
14. चतुर्थी कला 43
15. चतुर्थी कला पृ0 44
16. पञ्चमी कला पृ0 61
17. पञ्चमी कला पृ0 62
18. सप्तमी कला पृ0 90
19. प्रथमा कला पृ0 3